"तपन्तं तपसा लोकान् यथाभ्रापिहितं
रविम्।
विलच्य विस्मितः प्राह हंसस्तं हंसवाहनः॥")

हंसाङ्घ्रिः, पुं, (हंसस्य अङ्घ्रिरिव रक्तवर्णत्वात्।) हिङ्गुलम्। इति केचित्॥ हंसपादश्च॥

हंसाधिरूढ़ा, स्त्री, (हंसमधिरूढ़ा।) सरस्वती। यथा,—
"वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्द-
प्रभां
चन्द्रार्द्धाङ्कितमस्तकां निजकरैः संबिभ्रतो-
मादरात्।
वीणामक्षगुणं सुधाढ्यकलसं विद्याञ्च तुङ्गस्तनीं
दिव्यैराभरणैर्व्विभूषिततनुं हंसाधिरूढ़ां
भजे॥"
इति तन्त्रसारः॥

हंसाभिख्यं, क्ली, (हंसस्येव अभिख्या शोभा यस्य शुक्लवर्णत्वात्।) रूप्यम्। इति हेमचन्द्रः॥

हंसारूढ़ः, पुं, (हंसमारूढ़ः।) ब्रह्मा। यथा। रक्तवर्णं चतुर्म्मुखं द्विभुजं अक्षसूत्रकमण्डलुकरं हंसारूढ़ं ब्रह्माणम्। इति वैदिकसन्ध्याप्राणायामे ब्रह्मध्यानम॥ (यथा, बृहत्संहितायाम्। ५।५७।
"दण्डी यमो महिषगो
हंसारूढ़श्च पाशभृद्वरुणः॥")

हंसारूढ़ा, स्त्री, (हंसमारूढ़ा।) ब्रह्माणी। यथा,
"चतुर्मुखीं जगद्धात्रीं हंसारूढ़ां वरप्रदाम्।
सृष्टिरूपां महाभागां ब्रह्माणीं तां नमा
म्यहम्॥"
इति बृहन्नन्दिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतिः॥

हंसिका, स्त्री, (हंसी एव। स्वार्थे कन्। टाप्।) हंसी। इति शब्दरत्नावली॥

हंसी, स्त्री, (हंसस्य पत्नी। हंस+ङीप्।) हंसभार्य्या। तत्पर्य्यायः। चक्राङ्गी २ वरटा ३ चक्राकी ४ वरटी ५ सरःकाकी ६ हंसिका ७ वारला ८ हंसयोषित् ९। इति शब्दरत्नावली॥ वरला १० मराली ११ मञ्जुगमना १२ मृदुगामिनी १३। इति राजनिर्घण्टः॥ द्वाविंशत्यक्षरपादच्छन्दोविशेषः। यथा,—
"मौ गौ नाश्चत्वारो गो गो वसुभुवनयतिरिति
भवति हंसी।
याहं कान्तेनैकान्तेऽसौ विकचकमलमधुसुरभि
पिबन्ती
कामक्रीड़ाकूतस्फीतप्रमदसरभसभरमलघु
रवन्ती।
कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे
कंसाराते पश्य स्वेच्छं रसभसगतिरिह विल-
सति हंसी॥"
इति छन्दोमञ्जर्य्यां २ स्तवकः॥

हंसस्त्रीजातिः। इति मुग्धबोधव्याकरणम्॥

हंसोदकं, क्ली, (हंसं श्रेष्ठमुदकम्।) पानीयविशेषः। यथा,—
"नादेयं नवमृद्घटेषु निहितं सन्तप्तमर्कांशुभि-
र्यामिन्याञ्च निविष्टमिन्दुकिरणैर्म्मन्दानिलान्दो-
लितम्।
एलाद्यैः परिवासितं ........ पित्तोष्णदाहे
विषे
मूर्च्छारक्तमदात्ययेष च हितं शंसन्ति हंसो-
दकम्॥"
इति राजनिर्घण्टः॥

हंहो, व्य, सम्बोधनम्। (यथा, महाभारते। १२।२६७।८।
"तां गामृषिः स्यूमरश्मिः प्रविश्य यतिमब्रवीत्।
हंहो वेदा यदि मता धर्म्माः केनापरे मताः॥")
दर्पः। दम्भः। प्रश्नः। इति शब्दरत्नावली॥

हक्कः, पुं, (हक् इत्यव्यक्तशब्देन कायतीति। कै+कः।) गजसमाह्वानम्। इति जटाधरः॥

हक्कारः, पुं, (हक् इत्यव्यक्तशब्दस्य कारः करणम्।) आह्वानम्। इति केचित्॥

हञ्जा, व्य, नाट्योक्तौ चेटीसम्बोधनम्। इत्यमरटीकायां भरतः॥

हञ्जिः, पु, क्षुत्। इति जटाधरः॥

हञ्जिका, स्त्री, भार्गी। इति भावप्रकाशः॥ (अस्याः पर्य्यायो गुणाश्च। यथा,—
"ब्राह्मणयष्टाङ्गारवल्ली च खरशाका च हञ्जिका।
अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत्॥
व्रणोरःक्षतवीसर्पकृमिकुष्ठगदापहा।
अलक्तको गुणैस्तद्वत् विशेषाद्व्यङ्गनाशनः॥")
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हञ्जे, व्य, नाट्योक्तौ चेटीसम्बोधनम्। यथा,—
"हण्डे हञ्जे हलाह्वानं नीचं चेटीं सखीं प्रति॥"
इत्यमरः। १।७।१५॥
"हण्डे नीचसम्बोधनम्। हञ्जे चेटीसम्बोधनम्। हला सखी सम्बोधनम्। त्रयमेवाव्ययम्। यथा। हण्डे कुम्भिल। अरे हञ्जे काञ्चनमाले। हला सउन्तले इति। त्रयमप्यादन्तमव्ययमस्ति। हण्डा हञ्जा हला शब्दास्त्रयः सम्बोधनवाचकाः। इति प्राकृतवृत्तावव्ययपरिच्छेदे वसन्तराजः॥
'हञ्जेति चेटिकाह्वानं सख्याह्वानं हलेति च।
हण्डेति कुत्सिताह्वानमार्य्यो मारिष उच्यते॥"
इति भागुरिश्च॥
अनव्ययश्च हलाशब्दः सखीपर्य्यायोऽस्ति। वाला वासुः सखी हलेति त्रिकाण्डशेषे वोपालितः॥' "यत्सोऽहं मरिष्यामि हे हले भाषितस्य चेति तड़ितमिश्रः। त्रयमिदमव्युत्पन्नम्।" इति भरतः॥

हट, त्विषि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) त्विषि दीप्तौ।। हटति। इति दुर्गादासः॥

हटपर्णि, क्ली, शैवालम्। इति शब्दरत्नावली॥

हट्टः, पुं, क्रयविक्रयस्थानम्। हाट इति भाषा। इत्यमरः। २।५।९८॥

हट्टचौरकः, पुं, (हट्टस्य चौरः। ततः कन्।) चौरविशेषः। हाटचोर इति भाषा। तत्पर्य्यायः। मलीकरः २ माचलः ३ चिल्लाभः ४। इति शब्दरत्नावली॥ वन्दीकारः ५ प्रसह्यचौरः ६। इति त्रिकाण्डशेषः॥

हट्टविलासिनी, स्त्री, (हट्टे विलसतीति। वि+लस+णिनि। ङीप्।) गन्धद्रव्यविशेषः। तत्पर्य्यायः। धमनी २ अञ्जनकेशी ३ हनुः ४। इत्यमरः। २। ५। १३०॥ अस्याः पर्य्यायो यथा,-
"नखं व्याघ्रनखं व्याघ्रायुधन्तच्चक्रकारकम्।
नखं खल्पनखी प्रोक्ता हनुर्हट्टविलासिनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
हरिद्रा। इति भावप्रकाशः॥ पुस्तकान्तरे हरिविलासिनीति च पाठः॥ (वाराङ्गना। यथा, आर्य्यासप्तशत्याम्। ४३३।
"मृगमदनिदानमटवी कुङ्कुममपि कृषक-
वाटिका वहति।
हट्टविलासिनि भवती परमेका पौरसर्व्व-
स्वम्॥")

हठ, कीलबन्धे। बलात्कृतौ। प्लुतौ। इति कविकल्पद्रुमः॥ (भा०-पर०-सक-प्लुतौ अक०-सेट्।) कीले बन्धः कीलबन्धः। हठति छागं कीले बध्नाति इत्यर्थः। कातन्त्रादौ बलात्कारमात्रे। हठति परचक्रं बली। इति दुर्गादासः॥

हठः, पुं (हठ+पुंसीति घः।) बलात्कारः। इत्यमरः। २। ८। १०८॥ प्रसभं। इति मेदिनी॥ (हठयोगः। यथा, हठयोगप्रदीपिकायाम्। १।१०।
"अशेषतापतप्तानां समाश्रयमठो हठः।
अशेषयोगयुक्तानामाधारकमठो हठः॥)

हटपर्णी, स्त्री, (हठति प्लवते। इति। हठ+अच्। तादृशं पर्णमस्याः। ङीष्।) शैवालः। इति त्रिकाण्डशेषः॥

हठयोगः, पुं, (हठेन योगः।) योगविशेषः। यथा,—
"इदानीं हठयोगस्तु कथ्यते हठसिद्धिदः।
कृत्वासनं पवनाशं शरीरे रोगहारकम्॥
पूरकं कुम्भकञ्चैव रेचकं वायुना भजेत्।
इत्थं क्रमोत्क्रमं ज्ञात्वा पवनं साधयेत् सदा॥
धौत्यादिकर्म्मषट्कञ्च संस्कुर्य्याद्धठसाधकः।
एतन्माहात्म्यन्तु देवेशि! वायुपूर्णं प्रतिष्ठितम्॥
ततो मनो निश्चलं स्यात्तत आनन्द एव हि।
हठयोगान्न कालः स्यान्मनः शून्ये भवेद्यदि॥
इदानीं हठयोगस्य द्वितीयं भेदवत् शृणु।
आकाशे नासिकाग्रे तु सूर्य्यकोटिसमं स्मरेत्॥
श्वेतं रक्तं तथा पीतं कृष्णमित्यादिरूपतः।
एवं ध्यात्वा चिरायुः स्यादङ्गाजननवर्ज्जितः॥
शिवतुल्यो महात्मासौ हठयोगप्रसादतः।
हठाज्ज्योतिर्म्मयो भूत्वा ह्यन्तरेण शिवो भवेत्।
अतोऽयं हठयोगः स्यात् सिद्धिदः सिद्धसेवितः॥"
इति योगस्वरोदयः॥

हठालुः, स्त्री, (हठे प्लवने अलति पर्य्याप्नोतीति। अल+उण्।) कुम्भिका। इति शब्दचन्द्रिका॥

हठी, स्त्री, वारिपर्णी। इति जटाधरः।